॥ श्री ॥

॥ अथ श्री शिवपूजा प्रारंभः ॥

॥ खाजगत श्री. संभुभाई लाला शिव शिवदास. देसाई व कानूनगो — ॥
॥ जहागिरदार प्रगणें नंदुरबार यांचें असे.
तारीख १२ ऑगष्ट सन १९२७ ईसवी.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

पान १

शिव

॥ अथ शिव पूजन ॥

पूजा

॥ श्रीमन्महागणाधिपतये नमः ॥ श्रीगुरुभ्यो नमः ॥ लक्ष्मी नारायणाभ्यां नमः ॥ उमा-
महेश्वराभ्यां नमः ॥ शचिपुरंदराभ्यां नमः ॥ मातापितृचरण कमलेभ्यो नमः ॥ कुलदेवता-
भ्यो नमः ॥ इष्ट देवता भ्यो नमः ॥ ग्रामदेवताभ्यो नमः ॥ स्थानदेवता भ्यो नमः ॥ वास्तुदे-
वताभ्यो नमः ॥ सर्वेभ्यो देवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥ एतत्कर्म प्रधान-
देवता श्रीभवानी शंकराभ्यां नमः ॥ आदिआदि नवग्रह देवताभ्यो नमः ॥ अक्षतांगृहित्वा ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥ लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ धूम्रकेतुर्गणा-
ध्यक्षो भालचन्द्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ विद्यारम्भे विवाहे च
प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ॥
प्रसन्न वदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ अभिप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः ॥ सर्व विघ्न हर-
स्तस्मै गणाधिपतये नमः ॥ वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ॥ निर्विघ्नं कुरु मे देव सर्व-
कार्येषु सर्वदा ॥ सर्व मङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ॥ शरण्ये त्र्यम्बके गौरि नारायणि-
नमोस्तुते ॥ सर्वदा सर्व कार्येषु नास्ति तेषाममङ्गलम् ॥ येषां हृदिस्थो भगवान्मंगलायतनं हरिः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

शिव पान २

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ ~~येषां हृदिस्थो~~ येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥

विनायकं गुरुं भानुं ब्रह्मविष्णु महेश्वरान् ॥ सरस्वतीं प्रणम्यादौ सर्वकार्यार्थ सिद्धये ॥ पूजा

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ॥ विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ देवा दिशन्तु नः सिद्धिं ब्रह्मेशान जनार्दनः ॥ श्री

गणपतीपर चोखा वधावीदेवा ॥ विष्णु विष्णु विष्णुः ॥ स्वाश्मान जलमादय (हाथमांपाणी लेवुं) ॥ श्रीमद्भग-

वतो महापुरुषस्य विष्णो राज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीय परार्द्धे विष्णुपदे श्रीश्वेत-

वाराहकल्पे वैवस्वत मन्वंतरे अष्टाविंशति तमे युगे युगे चतुष्के कलियुगे तत्प्रथमचरणे भरतवर्षे

भरतखण्डे जम्बुद्वीपे दण्डकारण्ये देशे गोदावर्या दक्षिणे तीरे शालिवाहन शके बौद्धाव-

तारे रामक्षेत्रे ऽस्मिन्वर्तमाने अमुक नाम संवत्सरे ॥ अमुक अयने ॥ अमुक ऋतौ ॥

मासोत्तमे मासे अमुक मासे ॥ अमुक पक्षे ॥ अमुक तिथौ ॥ अमुक वासरे ॥ अमुक दिवस

नक्षत्रे ॥ अमुक स्थिते वर्तमाने चन्द्रे ॥ अमुक स्थिते वर्तमाने सूर्ये ॥ अमुक स्थिते वर्तमाने गुरौ ॥

शेषेषु ग्रहेषु यथायथं राशिस्थान स्थितेषु सत्सु शुभनाम योगे शिव करण एवं गुण विशेषण –

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

विशिष्टायां शुभ पुण्य तिथौ मम आत्मनः श्रुति स्मृति पुराण सकल शास्त्रोक्त फल प्राप्त्यर्थं

अस्माकं सर्वेषां क्षेम स्थैर्यायुरारोग्यैश्वर्याभि वृद्ध्यर्थं द्विपद चतुष्पद सहितानां शांत्यर्थं –

पुष्ट्यर्थं तुष्ट्यर्थं समस्त मंगला वाप्त्यर्थं समस्ताभ्युदयार्थं च श्री भवानिशंकर देवता प्रीत्यर्थं –

यथा मिलितोपचार द्रव्यैः ध्यान स्नानादि विविधोपचारैः पुजां करिष्ये ॥ तदंगत्वेन

आसनादि कलशा राधनं च तथा च शंख घंटा पुजनं च करिष्ये ॥ वाम हस्ते सर्षपान गृहित्वा ॥

पृथ्वीति मंत्रस्य मेरु पृष्ठ ऋषीः कुर्मो देवता सुतल छंदः आसने विनियोगः ॥ ॐ पृथ्वी देवीच वि

द्महे सहस्र मूर्तिंश्च धीमही तन्नो मही प्रचोदयात् ॥ ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ॥

त्वंच धारय मां देवि पवित्रं च कुरु आसनं ॥ अप सर्पन्तु ते भूता ये भूता भूमि संस्थिताः ॥

ये भूता विघ्न कर्तारस्ते नश्यन्तु शिवाज्ञया ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ॥

सर्वेषाम विरोधेन ब्रह्म कर्म करोम्यहम ॥ यदत्र संस्थितं भूतं स्थान माश्रित्य सर्वतः ॥ स्थानं –

त्यक्त्वातु यत्सर्वं यत्रस्थं तत्र गच्छतु ॥ भूतानि राक्षसा वापि येऽत्र तिष्ठंति केचन ॥ ते सर्वेप्य

गच्छन्तु देवयागं करोम्यहं ॥ सर्वस्यां दिशि विकीरेत् ॥ वाम पार्ष्णिना भूमौ घात त्रयं कुर्यात् ॥ तीक्ष्णदंष्ट्र
(डावी टाच)

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

शिव महाकाय कल्पांत दहनोपम ॥ भैरवाय नमस्तुभ्यं मनुज्ञां दातु महसि ॥ योगासनाय नमः॥ मूला-
पान३ विमलासनाय नमः॥ कूर्मासनाय नमः॥ ज्ञानासनाय नमः॥ नृसिंहासनाय नमः॥ अनंतास-
नाय नमः॥ मध्ये परम सुखासनाय नमः ॥ उदकोपस्पर्शः॥ स्वस्थानी डावी कलशस्थापन॥ कलशा-
कलशापर मुद्रा ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः॥ मूले तस्य स्थितो ब्रह्मा मध्ये
मातृगणाः स्मृताः॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा॥ ऋग्वेदोऽथ यजुर्वेदः साम-
वेदोह्यथर्वणः॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः॥ अत्र गायत्री सावित्री शान्ति
देवपूजार्थं
पुष्टिकरी तथा॥ आयान्तु यजमानस्य दुरितक्षय कारकाः॥ गङ्गे च यमुने चैव गोदावरि सरस्वती॥
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥ ब्रह्माण्डोदर तीर्थानि करैः स्पृष्टानि ते रवे॥ तेन-
सत्येन मे देव तीर्थं देहि दिवाकर॥ अङ्कुश मुद्रया सर्वाणि तीर्थान्यावाह्य॥ वं इति धेनु-
मुद्रया अमृती कृत्य॥ हुं इति कवचेनावगुंठ्य॥ मत्स्य मुद्रया आच्छाद्य॥ मूलम-
ष्टवार मभि मन्त्र्य॥ वरुणाय नमः॥ इति अभिमन्त्र्य॥ वरुणाय नमः आवाहयामि॥
वरुणाय नमः॥ आसनं समर्पयामि॥ वरुणाय नमः पाद्यं समर्पयामि॥ वरुणाय नमः-

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

अर्घ्यं समर्पयामि ॥ वरुणायनमः आचमनियं समर्पयामि ॥ वरुणायनमः स्नानं सम-
र्पयामि ॥ वरुणायनमः वस्त्रार्थं अक्षतान् समर्पयामि ॥ वरुणायनमः यज्ञोपवीतार्थं अक्ष-
तान समर्पयामि ॥ वरुणायनमः गंधं समर्पयामि ॥ वरुणायनमः अक्षतान्समर्पयामि॥
वरुणायनमः पुष्पं समर्पयामि॥ वरुणायनमः सौभाग्य द्रव्यं समर्पयामि॥ वरुणायनमः धूपं समर्पयामि॥
वरुणायनमः दीपं समर्पयामि॥ वरुणायनमः नैवेद्यं समर्पयामि॥ वरुणायनमः मुखवासार्थं पूगीफल-
ताम्बूल दक्षिणां समर्पयामि ॥ वरुणायनमः नीराजनं समर्पयामि ॥वरुणायनमः मन्त्रपुष्पां-
जलिं समर्पयामि ॥ वरुणायनमः प्रार्थना पूर्वक (... अक्षतान् गृहित्वा) नमो नमस्ते स्फटिक प्रभाय-
सुश्वेत हाराय सुमङ्गलाय ॥ सुपाश हस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते नमस्कारान्
कूर्यात धेनुमुद्रांमप्रदर्श॥
समर्पयामि ॥ अनया पूजया वरुणः साङ्गः सपरिवारः प्रीयताम् ॥ ताम्रादुदकं उदकं गृहित्वा (कलशोदकं)
आत्मानं संप्रोक्ष्य ॥ शिरः संप्रोक्ष्य ॥ पुनः स्वल्पोदकं गृहित्वा पूजाद्रव्याणि संप्रोक्ष्य ॥ तांच
भूमिं संप्रोक्ष्य ॥ तत्रमन्त्रः ॥ अपवित्रः पवित्रोवा सर्वावस्थां गतोपिवा ॥ यः स्मरेत्पुंडरीकाक्षं
सबाह्याभ्यन्तरः शुचिः ॥ पुंडरीकाक्षायनमः ॥ इति मार्जनं ॥ शंख पूजन ॥ त्रैलोक्ये यानि तीर्थानि-

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

शिव पान ४

वासुदेवस्य चाज्ञया ॥ ॐ [illegible] तिष्ठन्ति विप्रेन्द्र तस्माच्छंखं प्रपूजये ॥ त्वं पुरा सागरोत्पन्नो पूजा.
विष्णुना विधृतः करे ॥ निर्मितः सर्व देवानां पाञ्चजन्य नमोस्तु ते ॥ पाञ्चजन्यायनमः
॥ घंटापूजनंच करिष्ये ॥
सकल पूजार्थे गन्धं पुष्पं समर्पयामि ॥ आगमार्थन्तु देवानां गमनार्थन्तु रक्षसाम् ॥
कुरु घंटे वरं नादं देवतास्थान कारकम् ॥१॥ नागारि चिह्निता घंटा रथाङ्गेन समन्विता॥
वादना कुरुते नाशं जन्म मृत्यु भयस्यच ॥२॥ स्नानमर्चन क्रिया काले घंटा नादं करोतियः॥
कृष्ण भोगि सह स्थाणि सकले हरि मन्दिरे ॥३॥ घंटायै नमः सकल पूजार्थं गन्धं पुष्पं समर्पयामि ॥ ॐ [illegible] ॐ [illegible] मुद्रां [illegible] घंटे गरुड मुद्रां पदर्शय ॥ तत निर्विघ्न सिद्ध्यर्थं महागणपति स्मरणंच करिष्ये ॥ विघ्नेश्वराय वरदाय सुर प्रियाय ॥ लंबोदराय सकलाय जगत् हिताय ॥ नागाननाय श्रुति यज्ञ विभूषिताय ॥ गौरी सुताय गणनाथ नमो नमस्ते॥

॥ अथ भृंगि भृंगि नंदिकेश्वर पूजनंच करिष्ये ॥ अथ शिव पूजनंच करिष्ये ॥ अथ ध्यानं ॥

ध्याये न्नित्यं महेशं रजत गिरि निभं चारु चंद्रावतंसं॥ रत्ना कल्पो ज्वलांगं परशु मृगवरा भीति हस्तं प्रसन्नम् ॥ पद्मासीनं समंतात् स्तुत ममरगणै र्व्याघ्र कृत्तिं वसानं॥

विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥ ध्यानार्थे अक्षतां समर्पयामि॥
आसनं ॥ सिंहासने कनकरत्न मणि प्रभाभिच्छत्र ध्वजाल सितचामर तोरणाढ्ये ॥
बालार्क कोटि सदृशं कनकांबराढ्यं श्री विश्वनाथ मनसैव मयार्पितं ते ॥ साम्बाय-
सपरिवाराय महारुद्राय नमः आसनार्थे अक्षताम् समर्पयामि॥ दुर्वांकुराम्बुज मनोज्ञ-
पुष्पयुक्तं शुद्धं जलं सुरभिचूर्ण समन्वितं च। सौवर्ण पात्र विलसत्प्रभो विशुद्धं पाद्यं
गृहाण जगदीश मयार्पितं ते॥ साम्बाय सपरिवाराय महारुद्राय नमः पाद्यं समर्पयामि॥
दूर्वाद्य वारिल सुगन्धि हिरण्य रत्न दर्भाम्बुजं त्रिपथगा जल पुष्प युक्तम्। सौवर्ण पात्र-
रचितं घृत युक्त मर्घ्यं त्वं त्वं गृहाण मनसार्पितमिंदु मौले॥ साम्बाय सपरिवाराय
महारुद्राय नमः अर्घ्यं समर्पयामि॥ श्री जान्हवी जलमयं सरसं सुधावच्छैलाद्य वकुलशुभ-
गन्ध मनोभिरामम्। गौरीपते कनकपात्रधृतं मया ते भक्त्यार्पितं रुचिरमाचमनं
गृहाण॥ साम्बाय सपरिवाराय महारुद्राय नमः आचमनं समर्पयामि॥ तोयैश्च —
दुग्धदधि माक्षिक सर्पिराद्य सीतायुतैः कनक कुम्भ धृतैः समन्त्रैः। कर्पूर केसर सुगन्धि

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

शिव पूजा.

पान ५

भिरिन्दु मौले स्नानार्थं मर्पित मिदं विधिवद्गृहाण ॥ साम्बाय सपरिवाराय महारुद्राय नमः
पञ्चामृत स्नानं समर्पयामि ॥ शुद्धोदक स्नानं ॥ गंगा सिंधु सरस्वतीच यमुना गोदावरी-
नर्मदा । कावेरी शरयु महेंद्र तनया चर्मण्वती वेदिका ॥ क्षिप्रा वेत्रवती महासुरनदी ख्याता
गया गंडकी । पूर्णा पूर्ण जलै समुद्र सहिता कुर्वंतु सदा मंगलं ॥ साम्बाय सपरिवाराय
महारुद्राय नमः शुद्धोदक स्नानं समर्पयामि ॥ अथ वस्त्रार्थे अक्षतान्समर्पयामि ॥ यज्ञोपवी
तार्थे अक्षतान् समर्पयामि ॥ चंदनं समर्पयामि ॥ अक्षतान् समर्पयामि ॥ पुष्पं समर्पयामी ॥
बिल्व पत्रं समर्पयामि ॥ पंचधान्यं समर्पयामि ॥ सौभाग्य द्रव्यं समर्पयामि ॥ धूपं-समर्पयामि॥
दीपं दर्शयामि ॥ नैवेद्यं समर्पयामि ॥ मध्ये पानीयं समर्पयामि ॥ उत्तरापोशणं ॥ हस्त प्रक्षालनं॥
मुख प्रक्षालन ॥ करोद्वर्तनार्थे चंदनं समर्पयामि ॥ पुगी फल तांबूलं समर्पयामि ॥ हिरण्य-
गर्भेति दक्षिणाम् कल्पयामि ॥॥ आरार्तिक्यं ॥॥ कर्पूर गौरं करुणावतारं संसार सारं भुजगेंद्रहारम् ।
सदा वसंतं हृदयार विंदे भवं भवानी सहितं नमामि ॥ मंत्र पुष्पं ॥ करचरणकृतंवा कायजं कर्मजंवा
श्रवण नयनजंवा मानसंवा पराधम् । विहितम विहितंवा सर्व मेतत्क्षमस्व जयजय करुणा-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

श्री महादेव शंभो ॥ नमस्कारान् कुर्यात् ॥ उत्तरे निर्माल्यं विसृज्य ॥ पुनः गंधाक्षत
पुष्पाणि संपूज्य ॥ शिवोपरि जलधारया अभिषेकं कुर्यात् ॥ महिम्न स्तोत्रेण अभिषेकं
कुर्यात् ॥ अगर पुरुषसूक्तेन वा रुद्रेण अभिषेकं कुर्यात् ॥ ॐ नमः शिवाय ॥ अभिषेकं अर्पयामि ॥
शुद्धोदक स्नानं ॥ श्री जान्हवी जलमयं स्वरभं सुधावच्छीतल वह्नि शुभगन्ध मनोभिरामम् ।
गौरीपते कनकपात्र धृतं मया ते स्नानं गृहाण जगदीश मयार्पितं ते ॥ साम्बाय सपरिवाराय
महारुद्रायनमः शुद्धोदक स्नानं समर्पयामि ॥ कौशेय वस्त्र युगलं कनकैर्विचित्रं बालार्क कोटि
सदृशं च मनोभिरामम् । भक्त्या मयार्पितमिदं परिधाय शंभो सिंहासने स्वमुपविश्य
गृहाण पूजाम ॥ साम्बाय स. महारु. नमः वस्त्रं स० ॥ दत्तं मया सुमनसा वचना करेण
यज्ञसूत्र समर्थं परमं पवित्रम् । यद्ब्रह्म धर्म नित्यं परमासुरेलयज्ञो पवीत सुरशीकुल-
विश्वनाथ ॥ साम्बाय स० महारुद्रायनमः यज्ञोपवीतं स० ॥ यच्छ्रेष्ठ मस्ति मलया चलजन्य
नानां कर्पूर केसर सुगन्धि रसेन धृष्टम् । आमोदमान मलिनां मनसा धृतं यत्तच्चंदनं त्व सुरसी-
कुरु हीनबंधो ॥ साम्बाय स० महारु० नमः गन्धं स० ॥ अथवा ॥ श्रीखंडनं चंदनं दिव्यं गंधाढ्यं
सुमनोहरम् । विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम ॥ साम्बाय सपरिवाराय महारुद्राय नमः गन्धं समर्पयामि ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

शिव पान ६

श्वेतैश्चखण्डित मनोहर शालि बीजैः संशोधितैः शुचितरैश्च सुगन्ध मिश्रैः। त्वामर्चयामि भगवन् पूजा

मनसा वरेश गौरीपते मयि निधेहि कृपा कटाक्षम् ॥ साम्बाय० अक्षतान् स०॥ अथवा॥

अक्षता शुभा:

अक्षता स्तंडुलाः शुभ्राः कुंकुमेन विराजिताः। मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ साम्बाय अक्षतान् स०॥

बिल्वैश्च चम्पक मनोहर जाति पुष्पैः मन्दार पङ्कज जपा तुलसी दलैश्च। सम्भाविका कनक पुष्प-

भरैर्मया ते संपूजितो मयि निधेहि कटाक्षम् ॥ साम्बाय० यथा लाभ पुष्पं स०। साम्बाय

बिल्वपत्राणि स० ॥ माणिक्य मुक्ता मणि विद्रुमैश्च गोमेद पद्मारुण पुष्परागैः। देवेन्द्र नीलैश्च

कृतं गृहाण गोरत्न वैडूर्ययुतं च हारम् ॥ साम्बाय नवरत्न हारार्थे पुष्पमालां समर्पयामि॥.

बिल्वदलार्पणं च करिष्ये। शिव सहस्र नामावल्याः ॥ अगर बिल्वाष्टकेन बिल्वदलार्पणम् ॥ श्रीगणेशाय-

नमः॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम्। त्रिजन्म पापसंहार मेकबिल्वं शिवार्पणम्

॥१॥ त्रिशाखैर्बिल्व पत्रैश्च अच्छिद्रैः कोमलैस्तथा। शिवपूजां करिष्यामि एकबिल्वं शिवार्पणम् ॥२॥

अखण्ड बिल्व पत्रेण पूजितं नन्दिकेश्वरम्। शुध्यन्ति सर्व पापेभ्यो एकबिल्वं शिवार्पणम् ॥३॥

शालिग्राम शिला मेकां विप्राणां जातु अर्पयेत्। सोमयज्ञ महापुण्यं एकबिल्वं शिवार्पणम् ॥४॥

"Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

दन्ति कोटि सहस्राणि अश्वमेध शतानि च । कोटिकन्या महादानं एकबिल्वं शिवार्पणम् ॥५॥
लक्ष्म्याश्च स्तन उत्पन्नं महादेव सदा प्रियम् । बिल्ववृक्षं प्रयच्छामि एक बिल्वं
शिवार्पणम् ॥६॥ दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् । अघोर पाप संहारं एक-
बिल्वं शिवार्पणम् ॥७॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे । अग्रतः शिव-
रूपाय एकबिल्वं शिवार्पणम् ॥८॥ बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
सर्वपाप विनिर्मुक्तः शिवलोकमवाप्नुयात् ॥९॥ इति बिल्वाष्टकं संपूर्णम् ॥ पुष्पं ॥ गुलालं-
सर्व सौभाग्यं सर्व संपत्प्रदायकम् । धनधान्य समायुक्तं गुलालं प्रतिगृह्यताम् ॥ गु० स०॥
सुगंध वासितं दिव्यं अबिरं सुमनोहरम् । प्रत्यक्ष पूजयिष्यामि गृहाण परमेश्वर ॥ अबिरं स०॥
माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो । मया हृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥
पुष्पं समर्पयामि ॥१॥ करवीरै जाति कुसुमैश्चंपकैर्बकुलैः शुभैः । शतपत्रैश्च कल्हारै अर्चये परमेश्वर
॥पुष्पं स० ॥२॥ सेवंतिका बकुल चंपक पाटलाब्ज । पुन्नाग जाति करवीर रसाल पुष्पैः ॥ बिल्व-
प्रवाल तुलसीदल मालतीभिः । त्वां पूजयामि जगदीश्वर मे प्रसीद ॥ पुष्पं स० ॥३॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

शिव पान ८ पूजा

पार्वती पूजा ॥ हरिद्रा स्वर्णवर्णाभा सर्व सौभाग्य दायिनी । सर्वालंकार मुख्या हि देवि

त्वं प्रतिगृह्यताम् ॥ हरिद्रां स० ॥ हरिद्राचूर्ण संयुक्तं कुंकुमं कामदायकं । वस्त्रालंकरणं-

सर्वं देवि त्वं प्रतिगृह्यताम् ॥ कुंकुमं स० ॥१॥ कुंकुमं कामिनां दिव्यं कामिना काम संभवं ।

कुंकुमेनार्चिता देवी ललितांती प्रयच्छ मे ॥२॥ उदिता रुण संकाशं जपा कुसुम संनिभं ।

सीमंत भूषणार्थाय सिंदुरं प्रतिगृह्यताम् ॥ सिंदुरं स० ॥ सर्वोपचारार्थे राजोपचारार्थे

अक्षतां समर्पयामि ॥ धूपं ॥ वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः सर्व-

देवानां धूपोयं प्रतिगृह्यताम् ॥ अमुक देवता धूपं स० ॥ दीपं ॥ आज्यं च वर्ति संयुक्तं

वन्हिना योजितं मया । दीपं गृहाण देवेश त्रैलोक्य तिमिरापह ॥ भक्त्या दीपं प्रय-

च्छामि देवाय परमात्मने । त्राहिमां निरयाद्घोराद् दीपज्योतिर्नमोस्तु ते ॥ अमुक दे० दीपं द०॥

नैवेद्यं ॥ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु । ईप्सितं मे वरं देहि

परत्र च परां गतिम् । शर्करा खंड खाद्यानि दधि क्षीर-घृतानि च । आहारं भक्ष्य

भोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥ अमुक देवता नैवेद्यं स० ॥ प्राणाय नमः स्वाहा ॥ अपानाय

" Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

नमः नमः नमः नमः नमः

स्वाहा ॥ व्यानाय स्वाहा ॥ उदानाय स्वाहा ॥ समानाय स्वाहा ॥ ब्रह्मणे स्वाहा ॥ मध्ये
पानीयं समर्पयामि ॥ उत्तरापोशणं स० ॥ हस्त प्रक्षालनं स० ॥ मुख प्रक्षालनं स० ॥
करोद्वर्तनार्थे चंदनं स० ॥ सर्व पाप हरं दिव्यं गांगेयं निर्मलं जलं । आचमनं मया
दत्तं गृह्यताम् परमेश्वर ॥ आचमनीयं समर्पयामि ॥ पूगीफलं महद्दिव्यं नागवल्ली
दलैर्युतं । कर्पूरैला समायुक्तं तांबूलं प्रतिगृह्यताम् ॥ अमुक दे० तां० समर्पयामि ॥
इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
फलेन फलितं सर्वं त्रैलोक्यं सचराचरं । तस्मात् फल प्रदानेन सफलाश्च मनोरथाः ॥ अमु० दे०
फलं स० ॥ हिरण्य गर्भ गर्भस्थं हेमबीजं विभावसोः । अनंत पुण्य फलदमतः शांतिं
प्रयच्छ मे ॥ अमुक दे० दक्षिणां स० ॥ चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव
सर्व ज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥ इ॥ कर्पूर खंड परिकल्पित पञ्चदीपैः रत्नप्र मौक्ति-
मुकुर धूलि संप्रवृद्धैः । नीराजितं त्रिजगदेकगुरो मयाते पादाम्बुजं दिशतु वांछित
कार्य सिद्धिम् ॥ सामुग्य स० मह० नमः नीराजनं समर्पयामि ॥ २॥ .

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

शिव
पान ८

पूजा

आरातली ॥ मस्तक मुनी जन तनया विमळाजुनि तारी हो विमळाजुनि तारी।
भाले रजनि नायक (२) वामांगे गौरी। नयनि पावक भक्षीं वनिला सुल गौरी हो
वनिला सुल गौरी ॥ कंठे विशधर कम्बुज व्याघ्राम्बर धारी ॥१॥ हर हर हर -
हर शिव भूतेशा हो जयशिव नागेशा
महादेव ^ ~~हर जयशिव भूतेषा हो हरशिव नागेशा~~ उजळुनि उत्तम दीप लाऊनि
कर्पुर दीप दुर करि भवपाशा ॥ हर हर हर महादेव ॥१॥ दशभुज पंचानना
वसली स्मशानी हो वसली स्मशानी। भस्मे उधळुनि अंगीं कंथा परिधानी
पन्नग रुंडे माळ भजली निरवाणी हो भजती निरवाणी। वृषभारुढ शिव-
योगी ओंकार शुलपाणी ॥ हर हर हर महादेव० ॥२॥ ~~[illegible]~~ विश्वंभर जटिला
शिव कर्पुर गौरा हो शिव कर्पुर गौरा। रतिपति जाळुनि क्रोधे वधिले त्या त्रिपुरा॥
शिव शिव नाम स्मरणे जप हा रघुवीरा हो जप हा रघुवीरा। नकळे महिमा शेषा
नकळे महिमा तुझा ॥ निर्गुण ओंकारा ॥ हर हर हर महादेव० ॥३॥ जप तप
साधन लेथें साधी करमाच्या ~~[illegible]~~ हो साधी करमाच्या। नाना तप्हर योगी आश्रय

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the "Yashwantrao Chavan Pratishthan, Mumbai."

धर्माचा । साधन परमार्थाचा भक्तां तुं साचा हो भक्तां तुं साचा । गाभ-
स्वानंदाचा अंतक सर्वांचा ॥ हरहर हर महादेव ॥ ३॥ सद्‌गुरु मेवें
साधुनि सद्‌गतिच्या दाला हो सद्‌गतिच्या दाला । मायेचें निर्मुळ दुःखाचें निर्मुळ-
शंकर तुं करता । एकविस स्वर्गें कंच आं तुनी तुं वसंता हो आं तुनि तुं वसता ।
वदले तानाजीचें वदले भक्ताजीचें शिव शिव हे वालों । हरहरहर महादेव ॥ ४॥ .
कर्पुरार्तिक्य ॥ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा वसंतं
हृदयारविंदे भवं भवानी सहितं नमामि ॥ मंगलं भगवान विष्णुं मंगलं गरुडध्वजं ।
मंगलं पुंडरिकाक्ष मंगलायतनो हरिः ॥ सर्व मंगल मांगल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यंबके गौरी नारायणि नमोस्तुते ॥ इति कर्पुरार्तिक्य दीपं समर्पयामि ॥ देवानां वंदनं ।
आत्मानं वंदनं ॥ हस्त प्रक्षालनं ॥ मंत्र पुष्पांजली ॥ चन्द्रोत्भासित शेखरे स्मरहरे
गंगाधरे शंकरे । सर्पैर्भूषित कण्ठकर्ण विवरे नेत्रोत्थ वैश्वानरे । दन्तित्वक्कृत सुन्दराम्बरधरे
त्रैलोक्य सारे हरे । मोक्षार्थं कुरु चित्त वृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥ १॥ किंवाऽनेन

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

धनेन वाजिभिरिभिः प्राप्तेन राज्येन किं । किंवा पुत्र कलत्र मित्र पशुभिर्देहेन गेहेन किम्॥

शिव ज्ञात्वैतत्क्षण भंगुरं सपदि रे त्याज्यं मनो दूरतः । स्वात्मार्थं गुरु वाक्यतो भजभज पूजा

पान ९ श्रीपार्वती वल्लभम् ॥२॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं । प्रत्या-

यान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ॥ लक्ष्मीस्तोय तरङ्ग भङ्ग चपला-

विद्युच्चलं जीवितं । तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥३॥ करचरण-

कृतं वाक्कायजं कर्मजं वा श्रवण नयनजं वा मानसं वाऽपराधम् ॥ —

विहितम विहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्री महादेव शंभो ॥४॥-

सुगंधवल्ली शत पत्रिकाच्य सुगंध माला मुकुलोद्भवानि । गृहाण पुष्पाणि मया

हृ कृतानि पशो हरे ते बिल्व दलानी ॥ मंत्रपुष्प समर्पयामी ॥- यानि कानिच-

पापानि जन्मांतर कृतानिच । तानि तानि विनश्यंति प्रदक्षिण पदे पदे ॥ प्रदक्षिणा ॥

नमस्काराः ॥ ~~वै~~ वेदैः पुराण पाठैर्बहु शास्त्र विल्दीभिर्नि त्वमेव कथितं खलु भिन्न वृत्त्या।

तुभ्यं तदेव गिरिजाधिपते सुखलानस्मै नमामि सततं परमेश्वराय ॥ नमस्कारान् ॥

नमः सर्व हितार्थाय जगदाधार हेतवे । साष्टांगोऽयं प्रणामस्ते प्रयत्नेन मयाकृता ॥ नमोऽस्त्वनंताय सहस्र मूर्तये —

सहस्र पादाक्षि शिरोरु बाहवे । सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ॥ भवानीशंकर देवता नमस्कारान् ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

प्रार्थना ॥ रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं। नानारत्नविभूषितं
मृगमदामोदाङ्कितं चन्दनम्। जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा। दीपं देव
दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥ सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं।
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम् ॥ शाकानामयुतं जलं रुचिकरं —
कर्पूरखण्डोज्ज्वलं। ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥ छत्रं चामर=
योर्युगं व्यजनकं चादर्शकं निर्मलं। वीणा भेरि मृदंग काहलकला गीतं च नृत्यं तथा ॥
साष्टांगं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया। संकल्पेन समर्पितं तव विभो पूजां
गृहाण प्रभो ॥३॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं। पूजा ते
विषयोपभोगरचना निद्रा समाधिस्थितिः ॥ संचारः पदयोः प्रदक्षिणाविधिः स्तोत्राणि=
सर्वा गिरो। यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥४॥ करचरणकृतं वाक्कायजं
कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम्। विहितमविहितं वा सर्वमेतत्क्षमस्व जय=
जय करुणाब्धे श्री महादेव शंभो ॥५॥ १॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

शिव पान १० आवाहनं न जानामि न जानामि तवार्चनं। पूजां चैव नजानामि क्षमस्व परमेश्वर ॥ पूजा.

मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर। यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥
अपराध सहस्रांच्च क्रियते हर्निशं मया। दासो ऽयमिती मां मत्वा क्षमस्व परमेश्वर ॥
गतं पापं गतं दुःखं गतं दारिद्र्य मेवच्च। आगता सुख संपत्तीः पुण्याच्च तवदर्शनात् ॥
रूपं देहि यशो देहि जयं देहि यशो देहि द्विषो जहि। पुत्रान् देहि धनं देहि —
सर्वान्कामांश्च देहिमे ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम। तस्मात्कारुण्य-
भावेन रक्षस्व परमेश्वर ॥ प्रातःकाले शिवं दृष्ट्वा निशी पापं विनश्यती। आजन्म-
कृत माध्यान्हे सायांन्हे सप्तजन्मनी ॥ मेरु कांचन दत्तानां गवां कोटी शतैरपी।
पंच कोट तुरंगांनां तत्फलं शिव दर्शने ॥ मुखेन डमरु नादं कुर्यात ॥ यस्य स्मृत्या
च नामोक्त्या तपः पूजा क्रिया दिषु। न्युनं संपूर्णतां याति सद्यो वंदे तमच्युतं॥
इति प्रार्थना ॥ अनेन मया यथाज्ञानेन यथा मिलितोपच्यार द्रव्यैः कृत पूजनेन श्री
भवानी शंकर देवतः प्रियतां न मम ॥ घंटा पूजयेत् ॥ शंख मध्ये स्थितं तोयं भ्रामितं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

केशवो परि। अंगस्नानं मनुष्याणाम् ब्रह्महत्यां व्यपोहती ॥ अकाल मृत्यु हरणं सर्व
व्याधि विनाशनं। विष्णु पादोदकं तीर्थं जठरे धारयाम्यहम् ॥ अच्यु
तानंत गोविंद नामोच्चारण भेषजात् ॥ नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ (तीर्थं, ...)

शडाक्षर ॐ नमः शिवाय ॥ पंचाक्षर नमः शिवाय ॥ यथाशक्ति जप निवेदनं कुर्यात् ॥

इति शिवपूजा समाप्ता:

हें पुस्तक नंदुरबार ग्रामवासी संभुभाई लालाशिव शिवदास देसाई यांचे करितां शिवलालदास संभुभाई देसाई यांनी स्वहस्तानं लिहिले असे शके १८४९ प्रभव नाम संवत्सरे संवंत १९८३ बहुधान्य नाम संवत्सर श्रावण शुद्ध १४ भृगुवासरे तारीख १२ माहे ऑगष्ट सन १९२७ इसवी रोजीं दुपारीं दीड वाजतां लिहिणें संपलें.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

प्रातःकाले शिवं दृष्ट्वा निशीपापं विनश्यती। आजन्म कृत माध्यान्हे . सायान्हे सप्तजन्मनी
मेरुकांचन दत्तानां गवां कोटिपि शतैरपी। पंचकोटि तुरुंगाणां तत्फलं शिवदर्शनम्॥-
सुखेन स्मरणं नाहं कुर्यात्॥ . सत्य स्मृत्या.

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com